योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०१२

द्वादशः सर्गः १२

भुशुण्ड उवाच ।

ख एव व्योम संपन्नमिति संकल्पनं यथा ।

भ्रान्तिमात्रमसद्रूपं तथाहंभावभावनम् ।। १

खे खं जातमिति भ्रान्तेरहं कल्पयिता यथा ।

तथा निर्व्यपदेश्यात्म सदस्त्यसदिवाततम् ।। २

खे खात्मैवास्ति चिद्रूपं तत्स्वकं बुध्यते वपुः ।

भासते यदिदन्त्वेन नाहमस्मि न चानहम् ।। ३

ततश्चिद्रूपमस्तीदृग्यत्र स्थूलं खमप्यलम् ।

अणाविव महामेरुस्तत्संवित्तिर्हि खादिता ।। ४

घनस्ततोऽचिदाभासः खादप्यतितरामणुः ।

जानाति यत्स्वभावं तदेतत्सर्गतया स्थितम् ।। ५

अहन्ताखादिताद्यात्मविदः प्रसरणं जगत् ।

अम्भोद्रवप्रसरणं यथावर्तादिवेष्टनम् ।। ६

अचित्प्रसरणं शान्तमस्पन्दीव जलद्रवः ।

निःस्पन्दपवनाकारमाकाशहृदयोपमम् ।। ७

न देशकालादिजगत्प्रसरेषु च युज्यते ।

घनाच्छून्यान्निराभासाच्चिन्मात्रविसरादृते ।। ८

चिन्मात्रे प्रसृते काले व्योम्नि नावि जले स्थले ।

निद्रायां जाग्रति स्वप्ने भवेज्जगदिवोदितम् ।। ९

प्रसरणाप्रसरणे न च संभवतो विदः ।

खादप्यत्यन्तस्वच्छत्वादक्षोभादेः सदैव हि ।। 6.2.12.१०

ज्ञश्चेतति न भोगादि न चैवात्मन्यसावहम् ।

द्रवत्वमम्भसीवान्तरद्वितीयः परे स्थितः ।। ११

धीर्ह्रीः श्रीर्भीः स्मृतिः कीर्तिः कान्तिरित्यादिकंगणं ।

न पश्यति विसंकल्पस्तमसीव पदान्यहेः ।। १२

ब्रह्मेन्दुबिम्बस्फुरितचिज्ज्योत्स्नांशामृतद्रवः ।

दिक्कालासंभवात्सर्गो नेश्वरादतिरिच्यते ।। १३

आधिमान्यः स्फुरत्येवं परे स्फुरति भासुरम् ।

जगदाद्यात्मकं चित्तं चक्रौघत्वमिवाम्भसि ।। १४

मज्जनोन्मज्जनारावैर्विवर्तावर्तवेष्टनैः ।

अच्छिन्नानुपदं क्षीणा भाति सर्गसरिच्चिरम् ।। १५

यथावर्तैः पयो भाति धूमो भाति यथा घनः ।

तथा जडात्मकतया तृतीयः सर्ग एतयोः ।। १६

दारुणि क्रकचच्छेदे यथावर्तादिकं तथा ।

अदिगादौ परे सर्गस्तदतद्रूपवानयम् ।। १७

संसारकदलीस्तम्भाद्विना संकल्पपल्लवम् ।

मृदुनोऽपि दृषत्क्रूरान्न किंचिल्लभतेऽन्तरम् ।। १८

सहस्रखुरमूर्धाक्षिकरवक्त्रहितोहितम् ।

नानाद्रितनुदिग्देशसरित्प्रादेशमात्रकम् ।। १९

अन्तःशून्यमसारात्म बहुरागोपरञ्जितम् ।

स्फुरद्विरागविहितमार्जनामात्रतर्जनम् ।। 6.2.12.२०

ससुरासुरगन्धर्वविद्याधरमहोरगम् ।

जडात्मपवनस्पन्दि परचेतनचेतितम् ।। २१

पटे चित्रमहाराज्यमिव भासुरसुन्दरम् ।

परामर्शासहं चारु विकल्पस्फूर्जितं जगत् ।। २२

स्पन्दात्मनि विकल्पांशे पतिताऽसत्यरूपिणि ।

संवित्प्रसरति भ्रान्तौ तैलबिन्दुरिवाम्भसि ।। २३

हृल्लेखाजालविसरैः सर्वावर्तविवर्तनैः ।

विसरत्स्नेहसंमिश्रजडानुदयचर्वणैः ।। २४

अहमित्यादिचिद्रूपे विकल्पेनोन्मुखी सती ।

न पराद्व्यतिरिक्तैषा जलत्वादिव तोयता ।। २५

चिदादित्यः स्व आत्मैव सर्ग इत्यभिधीयते ।

भूत्वाहमिति तेनान्यो न सर्गोऽस्ति न सर्जकः ।। २६

स्पन्दात्मिकायां सत्तायां यथा स्पन्दो जलद्रवः ।

तथा चिदात्मा व्योमत्वेनव्योमत्वादि वेत्ति हि ।।२७

देशकालादिनिर्माणपूर्वकं वेदनं विदः ।

सर्गात्मकत्वात्तेनाम्बुद्रवसाम्यं न दूरगम् ।। २८

मनोहंभावबुद्ध्यादि यत्किंचिन्नाम वेदनम् ।

अविद्यां विद्धि यत्नेन पौरुषेणाशु नश्यति ।। २९

अर्धं मिथःसंकथया भागः शास्त्रविचारणैः ।

आत्मप्रत्ययतः शिष्टमविद्याया निवर्तते ।। 6.2.12.३०

चतुर्भागात्मनि कृते इत्यविद्याक्षये क्रमात् ।

समकालाच्च यच्छिष्टं तदनामार्थसन्मयम् ।। ३१

श्रीराम उवाच ।

अर्धं मिथःसंकथया भागः शास्त्रविचारणैः ।

आत्मप्रत्ययतो भागः कथं तस्या निवर्तते ।। ३२

समकाले क्रमाच्चेति मुनिनाथ किमुच्यते ।

तदनामार्थसच्चेति सच्चासच्चेति किं वद ।। ३३

श्रीवसिष्ठ उवाच ।

सुजनेन विरक्तेन संसारोत्तरणार्थिना ।

सह चाप्यात्मविदुषां संसृतिं प्रविचारयेत् ।। ३४

यतः कुतश्चिदन्विष्य सविरागममत्सरम् ।

जनं सज्जनमात्मज्ञं यत्नेनाराधयेद्बुधः ।। ३५

संपन्ने संगमे साधोरविद्यार्धं क्षयं गतम् ।

विद्धि वेद्यविदां श्रेष्ठ ज्येष्ठश्रेष्ठदशोदयात् ।। ३६

अर्धं सज्जनसंपर्कादविद्याया विनश्यति ।

चतुर्भागस्तु शास्त्रार्थैश्चतुर्भागं स्वयत्नतः ।। ३७

एकोऽभिलाष उत्पन्नो भोगेभ्यश्च निवार्यते ।

तत्क्षये यात्यविद्यायाश्चतुर्थांशः स्वयत्नतः ।। ३८

साधुसङ्गमशास्त्रार्थस्वयत्नैः क्षीयते मलम् ।

एकैकेनाथ सर्वैश्च तुल्यकालं क्रमादपि ।। ३९

यदविद्याक्षयैकात्म न किंचित्किंचिदेव च ।

शिष्यते तत्परं प्राहुरनामार्थमसच्च सत् ।। 6.2.12.४०

ब्रह्मेदं घनमजराद्यनन्तमेकं

संकल्पस्फुरणमविद्यमानमेव ।

बुद्ध्वैवं व्यपगतमानमेयमोहो

निर्वाणं परिविहरन्विशोकमास्स्व ।। ४१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मो० निर्वाणप्रकरणे उ० वि० संकल्पसर्गयोरैक्यप्रतिपत्तिर्नाम द्वादशः सर्गः ।। १२ ।।